क्षुद्राम्लिका, स्त्री, (क्षुद्रा अम्लिका ।) वृक्षविशेषः । आववति इति आवता इति च हिन्दी भाषा ॥ तत्पर्य्यायः । चाङ्गेरी २ चुक्राम्ला ३ चुक्रिका ४ लोणाम्ला ५ चतुःपर्णी ६ लोणा ७ वोढ़ा ८ अम्लपत्रिका ९ अम्लष्ठा १० अम्लवती ११ अम्ला १२ दन्तशठा १३ शाखाम्ला १४ अम्लपत्री १५ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । वह्निवर्द्धनत्वम् । रुचिकारित्वम् । ग्राहित्वम् । दोषदुर्नामकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रिका, स्त्री, (क्षुद्र + संज्ञायां कन् ततः टाप् पूर्व्वातः इत्वञ्च ।) दंशः । इति राजनिर्घण्टः ॥ (हिक्कारोगप्रकारभेदः । यथा,—
"विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता" ॥
इत्युत्तरतन्त्रे पञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥)

क्षुद्रेङ्गुदी, स्त्री, (क्षुद्रा इङ्गुदी कर्म्मधारयः ।) यवासः । इति राजनिर्घण्टः ॥ (यवासशब्दे ज्ञातव्यमस्या विवरणम् ॥)

क्षुद्रेर्व्वारुः, पुं, (क्षुद्रा इर्व्वारुः कर्म्मधारयः ।) गोपालकर्कटी । इति राजनिर्घण्टः ॥

क्षुद्रोदुम्बरिका, स्त्री, (क्षुद्रा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकनाम्नी, स्त्री, (क्षुद्रा उपोदकनाम्नी ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकी, स्त्री, (क्षुद्रा उपोदकी ।) स्वल्पपूतिकाशाकः । तत्पर्य्यायः । सूक्ष्मपत्रा २ मरुटपी ३ । अस्या गुणाः । "रसवीर्य्यविपाकेषु सदृशी पूर्व्वया स्वयम्" । पूर्व्वया उपोदक्या । इति राजनिर्घण्टः ॥

क्षुद्रोलूकः, पुं, (क्षुद्र उलूकः नित्यकर्म्मधारयः ।) कुरुवः । इति राजनिर्घण्टः ॥

क्षुध, ऌ य औ क्षुदि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-अनिट् ।) क्षुद्भक्षणेच्छा । ऌ, अक्षुधत् । य, क्षुध्यन्नं बुभुक्षितः । औ, क्षोद्धा । इति दुर्गादासः ॥

क्षुधा, स्त्री, (क्षुध् बुभुक्षायां सम्पदादित्वात् क्विप् हलन्तत्वात् वा टाप् ।) भोजनेच्छा । इति दुर्गादासः ॥ अभ्यवहारजिहीर्षा इति ॥ "या देवी सर्व्वभूतेषु क्षुधारूपेण संस्थिता" । इति देवीमाहात्म्यटीकायां नागोजीभट्टः ॥ तत्पर्य्यायः । अशनाया २ बुभुक्षा ३ क्षुत् ४ । इत्यमरः शब्दरत्नावली च ॥ जिघत्सा ५ । इति जटाधरः ॥*॥ तत्कार्य्याणि यथा,—
"व्याधयो निर्ज्जिताः सर्व्वे क्षुधया नृपसत्तम ! ।
कुण्डली मुकुटी स्रग्वी तथैवालङ्कृतो नरः ।
क्षुधार्त्तो न विराजेत प्रेतवत्तृषितो नृणाम् ॥
स्त्रीरत्नविविधान् भोगान् वस्त्राण्याभरणानि च ।
न चेच्छति नरः किञ्चित् क्षुधया कलुषीकृतः ॥
यथा भूमिगतं तोयं रविरश्मिभिः शुष्यति ।
शरीरस्थस्तथा धातुः शुष्यते जाठराग्निना ॥
न शृणोति न चाघ्राति चक्षुषा न च पश्यति ।
दह्यते वेपते मूढ़ः शुष्यते च क्षुधार्द्दितः ॥
एकतः बधिरत्वञ्च जरान्धत्वम्पङ्गुताम् ।
रौद्रं मर्य्यादहीनत्वं क्षुधा सर्व्वं प्रवर्त्तते ॥
भगिनीं जननीं पुत्त्रं भार्य्यां दुहितरं तथा ।
भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति" ॥
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥

क्षुधाकुशलः, पुं, (क्षुधायां क्षुधोद्रेकविषये कुशलः निपुणः विशेषेण क्षुधोत्पादकः ।) विल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

क्षुधातुरः, त्रि, (क्षुधा क्षुधया आतुरः ।) क्षुधापीड़ितः । यथा,—
"अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः" ।
इति गारुड़े ११६ अध्यायः ॥

क्षुधार्त्तः, त्रि, (क्षुधया आर्त्तः ऋतो वा तृतीयातत्पुरुषे ऋतस्य वृद्धिः ।) क्षुत्पीड़ितः । यथा,—
"शीतार्त्तश्च क्षुधार्त्तश्च कम्पान्वितकलेवरः ।
जजागार तदा रात्रौ स्नुतो नीहारवारिणा" ॥
इति शिवरहस्ये शिवरात्रिव्रतकथा ॥ (यथा, च मनुः । १० । १०७ ।
"भरद्वाजः क्षुधार्त्तस्तु सपुत्त्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः" ॥)

क्षुधाभिजननः, पुं, (क्षुधां अभिजनयतीति । अभि + जन् + ल्युः ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ क्षुधाजनकद्रव्यमात्रे त्रि ॥

क्षुधावती, स्त्री, (क्षुधाऽस्यामस्तीति । मतुप् मस्य वत्वम् ।) क्षुधाजनकौषधवटी । अजीर्णादिरोगनाशकगुड़िका । यथा,—
"रसायो गन्धकाभागा शुण्ठ्या त्रिफला वचा ।
यमानी शतपुष्पा च चविका जीरकद्वयम् ॥
प्रत्येकं पलमेषान्तु शठीकणापुनर्नवा ।
मागधं ग्रन्थिकश्चेन्द्रकेशराजसुदर्शनाः ॥
दण्डोत्पला त्रिवृद्दन्ती आमातरक्तचन्दनम् ।
भृङ्गापामार्गकुलका मण्डूकश्च पलार्द्धकम् ॥
आर्द्रकस्वरसेनाथ गुड़िकां संप्रकल्पयेत् ।
बदरास्थिसमाश्चैषां भक्षयित्वा पिबेदनु ॥
वारिभक्तं जलश्चैव प्रातरुत्थाय मानवः ।
वटी क्षुधावती नाम सर्व्वाजीर्णविनाशिनी ॥
अग्निञ्च कुरुते दीप्तं भस्मकञ्च नियच्छति ।
अम्लपित्तञ्च शूलञ्च परिणामकृतञ्च यत् ॥
तत्सर्व्वं शमयत्याशु भास्करस्तिमिरं यथा ।
मधुरं वर्ज्जयेदत्र विशेषात् क्षीरशर्करे" ॥
इति भैषज्यरत्नावल्यामम्लपित्तचिकित्सा ॥ तस्याः स्वल्पवृहद्भेदौ तत्रैव द्रष्टव्यौ ॥*॥ क्षुधायुक्ते त्रि ॥
(क्षुधाजनकापरौषधम् । यथा,—
"सम पञ्चचतुर्भागाष्टङ्कणक्षारकद्वये ।
त्रयस्त्रयः पटूनाञ्च द्वौ द्वौ मरिचचित्रयोः ॥
शुण्ठीलवङ्गयोर्द्वौ द्वावम्लयोगेन भावयेत् ।
वटीर्गोलप्रमाणेन कारयेद्भिषजां वरः ॥
आमशूलमम्लपित्तं पित्तशूलं विशेषतः ।
दुर्नामग्रहणीमुख्या मजीर्णानि विनाशयेत् ॥
नाम्ना क्षुधावती ह्येषा वह्निदेवेन निर्म्मिता ।
अस्याः प्रसादान्मन्दाग्निर्भवेद्दावानलो नरः" ॥
इति चिकित्सारत्ननिधौ मन्दाग्न्यधिकारे ॥)

क्षुधासागररसः, पुं, (क्षुधायां क्षुधाया वा सागरस्य इव क्षुधोद्रेकात् तथात्वम् ।) औषधविशेषः । यथा,—
"त्रिकटु त्रिफला चैव तथा लवणपञ्चकम् ।
क्षारत्रयं रसं गन्धं भागैकं पूर्व्ववद्विषम् ॥
गुञ्जामात्रां वटीं कुर्य्याल्लवङ्गैः पञ्चभिः सह ।
क्षुधासागरनामायं रसः सूर्य्येण निर्म्मितः" ॥
पूर्व्ववद्विषमित्यमृतवच्छुक्तभागवत् । तेनात्र विषस्य भागद्वयम् । इति भैषज्यरत्नावली ॥

क्षुधितः, त्रि, (क्षुध् + कर्त्तरि क्तः । यद्वा क्षुधा जाताऽस्य इति तारकादित्वादितच् प्रत्ययः ।) क्षुधान्वितः । तत्पर्य्यायः । बुभुक्षितः २ जिघत्सुः ३ अशनायितः ४ । इत्यमरः । ३ । १ । २० ॥

क्षुधुनः, पुं, (क्षुध बुभुक्षायां + "क्षुधिपिशिमिथः कित्" । उणां । ३ । ४४ । इति उनन् स च कित् ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

क्षुप, सादे । इति कविकल्पद्रुमः ॥ (सौं-परं-अकं-सेट् ।) सौत्रधातुरयम् । क्षुपः । इति दुर्गादासः ॥

क्षुपः, पुं, (क्षुप् + "इगुपधेति कः" । ३ । १ । १३५ ।) ह्रस्वशाखाशिफः । क्षुद्रवृक्षः । इत्यमरः । २ । ४ । ८ ॥ (यथा, महाभारते । १ । १७२ । २८ ।
"तस्या रूपेण स गिरिर्वेशेन च विशेषतः ।
स सवृक्षक्षुपलतो हिरण्मय इवाभवत्" ॥)
श्रीकृष्णात् सत्यभामायां जातपुत्त्रविशेषः । यथा,
"जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः ।
रौहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः ॥
भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा ।
चतस्रो जज्ञिरे तेषां स्वसारो गरुड़ध्वजात्" ॥
इति महाभारते हरिवंशे १६२ अध्यायः ॥*॥
इक्ष्वाकुराजपिता ! यथा,—
"आसीत् कृतयुगे तात! मनुर्द्दण्डधरः प्रभुः ।
तस्य पुत्त्रो महाबाहुः प्रसन्धिरिति विश्रुतः ॥
प्रसन्धेरभवद् पुत्त्रः क्षुप इत्यभिसंज्ञितः ।
क्षुपस्य पुत्त्रस्त्विक्ष्वाकुर्महीपालोऽभवत् प्रभुः" ॥
इति महाभारते । १४ । ४ । २-४ ॥ द्वारकापश्चिमदिक्स्थपर्व्वतः । यथा,—
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः" ॥
इति महाभारते हरिवंशे द्वारवतीविशेषनिर्म्माणे १५७ अध्यायः ॥

क्षुपकः, पुं, (क्षुप + स्वार्थे कन् ।) क्षुपः । क्षुद्रवृक्षः । यथा,—
"अतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते ।
असञ्जमूलः क्षुपको यद्वदुत्पाटने सुखः" ॥
इति सुश्रुते प्रथमभागे २४ अध्यायः ॥

क्षुपालुः, पुं, (क्षुप + आलुप्रत्ययः ।) पानीयालुः । इति राजनिर्घण्टः ॥

क्षुण्डोड़मुष्टिः, पुं, (दुल उत्क्षेपे + अच् ततो गुणः लकारस्य डत्वम् । दलापि कृतं पृषोदरात्